## प्राप्तापन्ने च द्वितीयया। (४/७१९)

एकदेशिनैकाधिकरणे (२.२.१/७१२) इति निवृत्तम्। द्वितीयासमासे (२.१.२४/६८६) प्राप्ते वचनमिदम्। समासविधानात् सोऽपि भवति। प्राप्त आपन्न [1]इत्येतौ द्वितीयान्तेन सह समस्येते, तत्पुरुषश्च समासो भवति। प्राप्तो जीविकाम् प्राप्तजीविकः, जीविकाप्राप्तः इति वा। आपन्नो जीविकाम् आपन्नजीविकः, जीविकापन्नः इति वा॥

## कालाः परिमाणिना। (५/७१६)

परिमाणमस्यास्ति इति परिमाणी, तद्वाचिना सुबन्तेन सह सामर्थ्यात् परिमाणवचनाः कालशब्दाः समस्यन्ते, तत्पुरुषश्च समासो भवति। षष्ठीसमास[2]विषये योगारम्भः। मासो जातस्य मासजातः। संवत्सरजातः। द्व्यहजातः। त्र्यहजातः॥

## नञ्। (६/७२६)

नञ् [3]समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। [4]न ब्राह्मणः अब्राह्मणः। [5]अवृषलः[6]॥

## ईषदकृता। (७/७५५)

ईषत् [7]इत्ययं शब्दोऽकृदन्तेन सुपा [8]सह समस्यते, तत्पुरुषश्च समासो भवति।

[८५] ईषद्गुणवचनेनेति वक्तव्यम्। (म. भा. १.४१२)।

[9]ईषत्कडारः। ईषत्पिङ्गलः। [10]ईषद्विकटः। [11]ईषदुन्नतः। ईषत्पीतम्। [12]ईषद्रक्तम्। गुणवचनेन इति किम्? [13]इह न भवति, ईषद् गार्ग्यः[14]॥

## षष्ठी। (८/७०२)

षष्ठ्यन्तं [15]सुबन्तं समर्थेन [16]सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। [17]राज्ञः पुरुषः राजपुरुषः। ब्राह्मणकम्बलः[18]।

[८६] [19]कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्। (म. भा. १.४१२)

इध्मप्रव्रश्चनः। पलाशशातनः। [20]किमर्थमिदमुच्यते? प्रतिपदविधाना [21]च षष्ठी न समस्यते (२.२.१०/७०४वा.) इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः (म. भा. १.४१२)॥

---

1. इत्येते ई, इत्येते शब्दरूपे क. 2. °विषयोऽयमारम्भः इ. 3. सुब्रन्तसमर्थेन क, सुबन्तं इत्यधिकम् क. 4. उदाहरणमिदं नास्ति ब. ड. फ. 5. अवृषला ब. 6. नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म। इत्यधिकम् अ. ब. ग. 7. इत्यव्ययं इ. 8. सह नास्ति ड. 9. नास्ति ड. 10. नास्ति फ. इ. 11. ईषन्मृदुः ह, ईषत्पीनः क, नास्ति इ. 12. ईषत्कृतं इ. 13. इह नास्ति फ. 14. अकृता इति किम्? ईषत्कारकः। ऐकपद्यम् ऐकस्वर्यं न भवतः। पीतादयः शब्दा रूढिशब्दाः, न कृदन्ताः इत्यधिकम् क. 15. सुबन्तं नास्ति इ. फ. ह. 16. सुपा फ, सुबन्तेन नास्ति अ. क. 17. राज्ञः पुरुषः नास्ति इ. फ. ह. 18. पशुपादः इत्यधिकम् इ. 19. ऋद्योगा फ, कृद्योगे क. 20. किमर्थं पुनरिदमुच्यते क. 21. च नास्ति क. ड. इ.